श्रीपञ्चमीव्रतं रम्यं या करोति पतिव्रता ।
तस्याहं स्थिरतां यामि यथा नारायणे स्थिरा ॥
मत्प्रसादान्मुनिश्रेष्ठ ! सर्व्वसौभाग्यमाप्नुयात् ॥”
इति ब्रह्मपुराणोक्तषट्पञ्चमीव्रतकथा समाप्ता ॥

अथ पञ्चमीजातफलं यथा ।

“भूपालमान्यो मनुजः सुगात्रः
कृपासमेतो विदुषां वरेण्यः ।
वाग्मी गुणी बन्धुजनैकमान्यः
प्रसूतिकाले यदि पञ्चमी स्यात् ॥”

इति कोष्ठीप्रदीपः ॥

विद्याविशेषः । तद्विवरणं यथा,—
“कामं विष्णुयुतं देवि ! शक्तिमायेन्द्रमेव च ।
महामायां ततः पश्चात् वाग्भवं बीजमुद्धरेत्॥”
विष्णुयुतं अकारयुक्तमित्यर्थः । शक्तिरेकारः ।
माया ईकारः ।
“वियच्चन्द्रस्ततः पश्चात् कलौ नकुलिरेव च ।
मायास्वरेण संयुक्तं नादबिन्दुकलान्वितम् ॥
प्रथमं कामराजस्य बीजं परमदुर्लभम् ।
वियद्विष्णुयुतं कामो हंसः शक्रस्ततः परम् ॥
महामाया ततः पश्चात् स्वप्नावतीति कथ्यते ॥”
हंसो हकारः । एतद्द्वितीयं कामकूटम् ॥ * ॥
“मादनं शिवबीजञ्च वायुबीजं ततः परम् ।
इन्द्रबीजं ततः पश्चात् महामायां समुद्धरेत् ॥”
इति तृतीयम् । इयं मधुमती ॥ * ॥
“शिवबीजं तथा कामं इन्द्रं देवीं नियोजयेत् ।
महामायां ततः पश्चात् शक्तिकूटं समुद्धरेत् ॥”
देवीं सकारम् ।
“वाग्भवं प्रथमं कूटं शक्तिकूटन्तु पञ्चमम् ।
मध्यकूटत्रयं देवि ! कामराजं मनोहरम् ।
कथिता पञ्चमी विद्या त्रैलोक्यसुभगोदया ॥”*॥

ईश्वर उवाच ।

“शृणु देवि ! महाभागे शक्तिकूटं सुदुर्लभम् ।
वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकम् ॥
शक्तिकूटं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।
जीवप्राणौ महादेवि ! मादनं तदनन्तरम् ॥
इन्द्रबीजं ततः पश्चात् भुवनेशी तु पञ्चमम् ॥”
जीवः सकारः । प्राणो हकारः । इति वा शक्तिकूटम् ॥ * ॥
“अथवा देवदेवेशि ! सौभाग्यायाश्च वाग्भवम् ।
कूटत्रयं कामराजं शक्तिबीजञ्च पूर्व्ववत् ।
एषा शाक्ता महादेवि ! पञ्चमी परमेश्वरी ॥”
अस्या वाग्भवं कूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवं कूटमित्यर्थः । कामराजकूटत्रयं पञ्चम्या एव ।
“वामनेत्रादिकूटं वा भगादिकूटमेव वा ।
अरिहा सिद्धिदा विद्या सर्व्वदोषविवर्ज्जिता ॥”
भग एकारः । एतेनाष्टधा पञ्चमी वाग्भवशक्तिकूटभेदेन ॥ * ॥ यामले ।
“द्विविधा पञ्चमी विद्या पञ्चपञ्चाक्षरी परा ।
मध्ये षडक्षरी चैव शक्तिश्च चतुरक्षरी ॥”
षड़िति कामराजविद्याया मध्यकूटमित्यर्थः ।
शक्तिरिति कामराजस्य शक्तिकूटमित्यर्थः ।
एषा चतुर्द्धा वाग्भवकूटभेदात् । एतयोः कामराजस्य तृतीयकूटन्तु तत्रैव ॥ * ॥
“कामबीजं महेशानि ! शिवबीजं ततः परम् ।
तदधो हंसबीजन्तु इन्द्रबीजं विचिन्तयेत् ॥
महामायां ततः पश्चात् कूटं परमदुर्लभम् ॥”
एषा पूर्व्ववदष्टधा । अन्या चतुर्द्धा ॥ * ॥
तथा तत्त्वबोधे ।
“कामाकाशपरा शक्र संस्थानकृतरूपिणी ॥”
परा सकारः । संस्थानकृतरूपिणी महामाया ॥*॥

तथा च तन्त्रे ।

“कामबीजं महेशानि ! शम्भुबीजं ततः परम् ।
तदधश्चन्द्रबीजन्तु पृथ्वीबीजं ततो लिखेत् ।
तदन्ते च महामाया कूटं परमदुर्लभम् ॥”
एषा पूर्व्ववदष्टधा । अन्या चतुर्द्धा । तेन षट्त्रिंशद्रूपिणी पञ्चमी ॥ * ॥ हंसमाहेश्वरे ।
“वामकेश्वरविद्यायाः कूटं वाग्भवमुत्तमम् ।
एकारादि वाग्भवन्तु कूटं वाग्भवमुत्तमम् ॥
एकारादि वाग्भवन्तु सौभाग्यायाश्च वाग्भवम् ।
एषा च पञ्चमी विद्या त्रैलोक्यवशकारिणी॥”*॥

श्रीक्रमे ।

“एतासां चैव विद्यानां प्राणं शृणु वरानने ! ।
रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ॥
शक्त्यन्ते तु महादेवि ! हंसं मायां रमां तथा ।
एभिर्युक्तेन देवेशि ! विद्याजपनमाचरेत् ॥”
जपश्च सप्तवारमेव दीपन्यां तथा दर्शनात् ।
एतासां पूर्व्वोक्तश्रीक्रमोक्तविद्यानाम् ॥ * ॥

पञ्चम्यान्तु विशेषो यथा ।

“रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ।
शक्त्यन्ते तु महेशानि ! हंसं मायां रमां तथा ॥
कामराजत्रये देवि ! ककारं शक्रसंयुतम् ।
मायाबिन्द्वीश्वरयुतं सूर्य्यकोटिसमप्रभम ॥
प्रथमं कामकूटस्य चाद्ये नियोजयेदिदम् ॥
वान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
नादबिन्दुसमायुक्तं श्रियो बीजमुदाहृतम् ।
द्वितीयं कामबीजन्तु जपेद्रक्षा च सुन्दरि ! ॥
गगनं वह्निसंयुक्तं वामनेत्रविभूषितम् ।
नादबिन्दुसमायुक्तं मायाबीजं प्रकीर्त्तितम् ॥
मधुमतीं जपेच्चापि सर्व्वकामफलप्रदाम् ॥”
इति तन्त्रसारः ॥ * ॥ * ॥ रागिणीविशेषः । सा च वसन्तरागस्य प्रिया । यथा,—
“वसन्ती पञ्चमी दोली वहारी रूपमञ्जरी ।
रागिण्य ऋतुराजस्य वसन्तस्य प्रिया इमाः ॥”

अस्या ध्यानं यथा,—

“सङ्गीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
खर्व्वाङ्गिणी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेत्त्री ॥”

इति सङ्गीतदर्पणः ॥

(नदीविशेषः । यथा, महाभारते ।६।६।२६।
“वरां वीरकराञ्चापि पञ्चमीञ्च महानदीम् ॥”)

पञ्चमीव्रतं, क्ली, (पञ्चम्यां माघशुक्लपञ्चमीमारभ्य षड़्वर्षं यावत् प्रतिमासीयशुक्लपञ्चम्यां स्त्रिया कर्त्तव्यं व्रतम् नियमविशेषः ।) माघशुक्लपञ्चमीमारभ्य षड़्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां स्त्रीकर्त्तव्यनियमविशेषः । तत्प्रयोगो यथा, तत्रादौ कृतनित्यक्रिया यजमाना कुशहस्ताचम्य स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । विष्णुर्नमोऽद्य माघे मासि शुक्ले पक्षे पञ्चम्यां तिथौ अमुकगोत्रा श्रीअमुकी पुत्त्रपौत्राद्यनवच्छिन्नसन्ततिमहदैश्वर्य्यसौभाग्यारोग्यसौन्दर्य्यावैधव्यप्राप्तिपूर्व्वकविष्णुलोकप्राप्तिकामा अद्यारभ्य षड़्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां गणपत्यादिनानादेवतासलक्ष्मीकवासुदेवपूजापूर्व्वकभविष्यपुराणोक्तकथाश्रवणरूपषट्पञ्चमीव्रतमहं करिष्ये । इति सङ्कल्प्य सूक्तं पाठयेत् । ततः सामान्यार्घ्यादि आसनशुद्धिभूतशुद्धिमातृकान्यासकराङ्गन्यासान्तं कृत्वा गणेशादीन् संपूज्य लक्ष्मीं नारायणञ्च यथाशक्ति पूजयेत् । ततो भोज्योत्सर्गं कृत्वा प्रणमेत् ॥ * ॥

अथ कथा ।

“शेषशय्यासमासीनं लक्ष्मीधृतपदाम्बुजम् ।
योगनिद्रान्वितं कृष्णं नारदः परिपृच्छति ॥
केनोपायेन भगवन्नारी दुःखं न विन्दति ।
सौभाग्यारोग्यसौन्दर्य्यपुत्त्रपौत्रादिकं लभेत् ॥
इत्युक्तो माधवश्चक्रे लक्ष्मीमुखनिरीक्षणम् ।
इङ्गिताकारतत्त्वज्ञा पद्मा पद्माक्षवल्लभा ।
वल्लभाज्ञां पुरस्कृत्य प्रीता वचनमब्रवीत् ॥

श्रीरुवाच ।

षट्पञ्चमीव्रतं सम्यक् श्रूयतां पापनाशनम् ।
सौभाग्यारोग्यसौन्दर्य्यपुत्त्रपौत्रधनप्रदम् ॥
माघे मासि सिते पक्षे पञ्चमी या शुभा भवेत् ।
तस्यामारभ्य कर्त्तव्यं षड़ब्दं व्रतमुत्तमम् ॥
प्रतिमासि च पञ्चम्यां लक्ष्मीं संपूज्य केशवम् ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैस्स्च पृथग्विधैः ॥
कुर्य्याद्धोमञ्च विधिवत् गणेशस्य ग्रहस्य च ।
विष्णोर्लक्ष्म्याश्च वाग्देव्या दुर्गाया विभवक्रमात् ॥
अन्येषाञ्च यथाशक्ति तिलाज्ययवधान्यकैः ।
ततोऽश्नीयादलवणमादौ संवत्सरद्वयम् ॥
तृतीये च चतुर्थे च हविष्यान्नञ्च भोजयेत् ।
पञ्चमे फलमश्नीयात् षष्ठे कुर्य्यादुपोषणम् ।
षष्ठे प्रतिष्ठा कर्त्तव्या भोजयेद्द्वादश द्विजान् ॥
तत्र षोड़शदानानि हेमशृङ्गीमलङ्कृताम् ।
दक्षिणासहितां दद्यादाचार्य्याय मुनीश्वर ।॥
ततः षड्जलकं दद्यात् सर्व्वालङ्कारभूषितम् ।
काञ्चनप्रतिमायुग्मलक्ष्मीनारायणान्वितम् ॥
विधिनानेन या कुर्य्यात् पञ्चमीव्रतमुत्तमम् ।
स्ववंशांस्तु समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
एतत्ते कथितं विप्र ! मर्त्त्यलोके प्रकाशितम् ।
शोकसन्तापहानिश्च वृथादुःखं न जायते ॥
धर्म्मं यशस्यमायुष्यमैश्वर्य्यञ्चापि वर्द्धयेत् ।
याश्च कुर्व्वन्ति भूर्लोके तासां सर्व्वं सुखावहम् ॥

श्रीरुवाच ।

शृणु सत्यं मुनिश्रेष्ठ ! देव्या यत् कथितं मयि ।
तदनुष्ठानसर्व्वन्तु प्रतिष्ठाञ्च द्विजोत्तम ! ॥
या करोति व्रतं साध्वी सर्व्वकामफलं लभेत् ।